# संस्कृतसाहित्यस्थरसविचारः

**हरिलाल जोशी**

*उपप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः*

joshiharilal12@gmail.com

https://orcid.org/0009-0003-1422-9869

https://doi.org/10.3126/srj.v1i2.99153

**लेखसारः**

*संस्कृतसाहित्यजगति रसस्य चर्चया साकं रसाध्ययनं व्याख्यानञ्चसाहित्यस्य पौरस्त्यपाश्चात्त्यक्षेत्रयोरेव बहुत्र कृतमस्ति। रसविवेक इति शीर्षकस्य आलेखेऽस्मिन् साहित्यिकनवरसानां नानास्वरूपाणां सूक्ष्मविवेचना कृतास्ति। रसशास्त्र काव्यशास्त्रस्य महत्त्वपूर्णमङ्गं विद्यते, यः पाठकानां श्रोतृणां वा हृदयोत्पन्नानुभूतेः विश्लेषणं करोति। अत्र नाट्यशास्त्रस्याद्याचार्य भरतमुनेः रससिद्धान्तमाधारीकृत्य रसपरिभाषा कृता। एवं रीत्या भरतस्यैव सूत्रमाधारीकृत्य भेदाः, उत्पत्तिकारकतत्त्वानि च लेखेऽस्मिन् सन्दर्शितानि सन्ति। रसस्यानुभूतिर्वा रसास्वादनं समवेतप्रक्रियास्तीति अत्र स्पष्टीकृतं वर्तते। रसोत्पादने कवेः प्रतिभा, पाठकस्य श्रोतृणां दर्शकानाञ्च संवेदनशीलतायाः कलासौन्दर्यस्य च प्रस्तुतिः युगपदेव सञ्चलति, अतः रसव्युत्पादनं सरलतया भवति। विशेषतः आलेखे रसानां उत्साहशमनिर्वेदादिनवस्थायिभावानां परिचयं दत्त्वा शृङ्गारवीरकरूणाद्भुतहास्यभयानकरौद्रबीभत्सशान्तानां सोदाहरणं परिचयश्च व्याख्यानं कृतमस्ति। रसाभ्यन्तरेऽभि विभावानुभावव्यभिचारिभावानां रससहायकतत्त्वानां भूमिकाविषयेऽ अत्र सम्यन्निरूपितं वर्तते। रसविषये उत्पत्तिवादानुमितिवादभुक्तिवादाभव्यक्तिवादान्नाधारीकृत्य पदवाक्यप्रमाणज्ञानां मतान्तरप्रदर्शनपूर्वकं कृतं विपुलं विचारमन्थनं च प्रदर्श्य रसस्य बाह्यस्वरूपं तिरोधाय आन्तरिकस्वरूपस्यास्मिन् लेखे सम्यक् प्रस्तुतं वर्तते। चरमेऽनुसन्धानात्मकालेखोऽयं पाठकान् न केवलं रसस्य नामानि रसस्य परिभाषाविषये शिक्षयति अपि तु रसनामन्तर्बोधं कारयति। असौ संस्कृतकाव्यसाहित्यस्य सौन्दर्यबोधः, सौन्दर्यचामत्कृतिश्च आत्मसात्कर्तुं सुतरां प्रेरयति।*

**शब्दकुञ्जी**:- अनुभावः, उपमा, व्यभिचारी, विभावः, सहृदयः।

**विषयपरिचयः**

साहित्यं खलु समाजस्य दर्पणत्वेन परिभाषितं वर्तते। साहित्यद्वारा समाजदर्शनं भवति। सत्साहित्ये जीवनगतिः प्राप्यते। समाजस्येत्थापनपतनादिकार्यजनकमपि साहित्यं भवितुमर्हति। हितेन सह सहितः, तस्य भावः साहित्यमिति अर्थलाभो भवति। सामाजिकविचारां संस्कृतेश्च ज्ञानं साहित्याद्भवति अतः साहित्यं दर्पण इति समाजस्य। साहित्यं खलु समाजं वहति। संस्कृतन्तु विश्वनिधिः वर्तते। साहित्यविहिनाय पशुसंज्ञा ददाति भर्तृहरिः -

*साहित्यसङ्गीतकलाविहीनः साक्षात्पशुपुच्छविषाणहीनः* (शास्त्री, २०१२, पृ.१२)। कविप्रतिभाद्वारा जनितं किमपि असाधारणरूपं कर्म एव काव्यं भवति। तत्र शब्दार्थयोः साहाय्येनैव भवति। मञ्जुलकाव्येषु तादृशमद्भूतं चित्रं द्रष्टुं शक्यते यत् -

*साहित्यपाथोनिधिमन्थनोत्थं काव्यामृतं रक्षत हे कवीन्द्राः ।*

*यदस्य दैत्या इव लुण्ठनाय काव्यार्थचैराः प्रगुणैर्भवन्ति* (त्रिपाठी, २०२४, पृ.३३७)।

साहित्यं स्वरूपं विपुलं विद्यते। संकुचितार्थे कवितानाटककथादीनां रूपं ज्ञायते परन्तु व्यापकार्थे तु तदेव साहित्यं समग्रसंस्कृतवाङ्मयमेव ज्ञापयति। पुरा वैदिकालादेव संस्कृतसंस्कारः प्रारब्धो सम्भूतः परिवर्धितश्च। वैदिककाले एव संस्कृतग्रन्थाः गवेषिताः परिशीलिताः विवेचिताश्च। संस्कृतवाङ्मयः तदेव समये संवर्धितः समृद्ध आसीत्। वेदाः, उपनिषदः, धर्मग्रन्थाः, साहित्यग्रन्थाः, दर्शनानि तथैव गणितज्योतिषावास्तु-शास्त्रछन्दशास्त्रव्याकरणार्युवेदप्रभृतिसंस्कृतभाषारचितसमस्तग्रन्थाः संस्कृतवाङ्मयं समर्थयन्ते। संस्कृतसाहित्यमपि संस्कृतवाङ्मयान्तर्भूतविषयो वर्तते। संस्कृतसाहित्यं शाखोपशाखाः दृश्यन्ते यथाः गद्यपद्यगीतिप्रभेदेन वैदिकसाहित्यं विभज्यते। तथैव गद्यपद्यचम्पूभेदेन त्रिधा विभज्यते लैकिकसाहित्यमपि विभज्यते। लघुगुरूभेदेन काव्यमहाकाव्यखण्डकाव्यगीतिकाव्यभेदेनापि विभज्यते। गद्यात्मकं साहित्यमपि कथाख्यायिकाभेदेन द्विविधं भवति। एवं श्रव्यकाव्यानि दृश्यकाव्यानि श्रव्यदृश्यकाव्यान्यपि भवन्ति। महाकाव्यादिकं श्रव्यकाव्येषु अयान्ति। तथैव दृश्यमिति रूपकम्। एवञ्च नाटकप्रकरणभाणव्यायेगसमवकारप्रहसनादिभेदेन रूपकमपि दशधा विभज्यते। उपरूपकाणामष्टादश भेदा सन्ति। वैदिकसाहित्ये श्रैतसूत्रधर्मसूत्रगृह्यसूत्रादीनि सन्ति। सर्वमपि पाणिनीयव्याकरणमन्यच्च व्याकरणम्, सर्वाणि दर्शनानि, सूत्रपद्धतिमाश्रित्यौवावतिष्ठन्ते। सूत्रपद्धतेरेव विशदीकरणाय भाष्याणामुपभाष्याणाञ्च परम्परा प्रचलिता वर्तते। अनूदिता ग्रन्थाश्चापि समायाताः वर्तन्ते।

संस्कृतवाङ्मय एव संस्कृतसाहित्यं मन्यते। संस्कृतसाहित्यस्य निर्माणो अष्टादशसहस्राणि वर्षाणि पूर्वमभूदिति। ततः संस्कृतसाहित्यस्य अविच्छिन्ना धारा अधुनापि प्रवहन्ती अस्ति। अन्यसाहित्यानां अध्ययनेन वा इतिहासाध्ययनेन ज्ञायते यत्, इयं साहित्यधारानुकुलपरिस्थितौ प्रवहति परन्तु विषमबेलायान्तु इयमपि मन्दीभवति। साहित्यमपि सामाजिकपरिस्थित्याधारावलम्बिता भवति। साहित्येन्नतये पतने च कारणं सामाजिकावस्था एव वर्तते। अन्यथा साहित्यस्याविच्छिन्ना धारा प्रवहत्येव। यथाः अदै वेदाः ततः ब्राह्मणग्रन्थाः, ब्राह्मणग्रन्थानन्तरमारण्यकाः, अरण्यकानन्तरमुपनिषद्ग्रन्थाः, उपनिषदामुपरान्तं रामायणामहाभारतपुराणानि, पुराणानामनन्तरं काव्यानाटकथाख्यायिकानां निर्माण अभूत्। अविच्छन्नतादृष्ट्यापि साहित्यस्यावश्यकत्वं महत्त्वञ्च दरीदृश्यत एव।

संस्कृतसाहित्यं सर्वतोमुखी वर्तते। धर्मार्थकाममोक्षादीनां लाभो संस्कृतसाहित्ये भवति। विस्तारेणैव मानवजीवनस्य चतुर्णामेव पुरूषार्थानामेव अत्र वर्णनं भवति। संस्कृतसाहित्ये धार्मिकग्रन्थैः सह विज्ञानज्योतिषवैद्यस्थापत्यपशुपक्षीप्रविधिसम्बन्धिग्रन्था अपि समुपलभ्यन्ते। प्रेयश्रेयशास्त्राणामुपलब्धि अत्र दृश्यते। धार्मिकदृष्ट्यापि संस्कृतसाहित्यस्य गौरवं अक्षुण्णं वर्तते। वस्तुतः वेदेखिलं धर्ममूलं इति ज्ञानधाराः जगत एव समग्रभूस्थलानि उर्वराणि कुर्वन्ति। धार्मिकदृष्ट्या, वैज्ञानिकदृष्ट्या च संस्कृतसाहित्यस्यानुशीलनमावश्यकं दरीदृश्यते। अस्माकं जीवने जन्मतः मृत्युपर्यन्तं यावन्तः संस्काराः सन्ति ते संस्कृतभाषायामेव सन्ति। कर्तव्याकर्तव्ययोः ज्ञानमपि संस्कृतः शिक्षयति। कतिपयान्यधार्मिककृत्यान्यपि संस्कृतभाषायामेव सम्पन्नानि सन्ति। जैनग्रन्थाः अपि संस्कृतभाषायां प्राप्यन्ते। पौरस्त्यवाङ्मयस्याध्ययनाय प्राचीन इतिहासज्ञानाय सम्यक्पर्यालेचनाय तु संस्कृतभाषां विना असम्भवं मेव दृश्यते। प्राचीनशिलालेखस्य पुरातत्त्वस्य च ज्ञानं संस्कृतसाहित्यस्य ज्ञानादृते न सम्भवति। अतः कस्यापि समाजस्य साहित्यं तस्य संस्कृत्याः द्योतकं भवति।

### समस्योद्देश्ये

रसः कः ? किमर्थञ्च रसः ? एताभ्यामेव द्वाभ्याम्प्रश्नाभ्यां प्रकाशेते समस्योद्देश्ये। रसस्य ऋते किन्न भवति ? रसस्यावश्यकता किमर्थं साहित्ये वरीवर्ति ? इत्यादयः जिज्ञासाः समुद्भवन्ति ताषां जिज्ञासानां शमनीकरणमेव उद्देश्यं वर्तते। अतः रस एव गवेषणायाः समस्या तस्य सविवेचनं प्रस्तुतिप्रदानं उद्देश्यं अस्ति। अनुसन्धानात्मकपत्रेऽस्मिन्रसस्य परिचयादारभ्य मतमतान्तरपुरःसरं मतभेदपूर्वकं पूर्वकं रसस्वरूपप्रदर्शनपूर्वकञ्च विपुलविवेचनमुल्लिखितं वर्तते।

### अध्ययनविधिः

शोधसामग्रीसङ्कलने प्रचलित निगमनागमनपद्धतीनां समुचितःप्रयोगःकृतो वर्तते। प्रधानतया रससाहित्यविषयकविमर्शनक्रमे नानाग्रन्थानामावश्यकमतानामनुशीलनेन निगमनविधिः स्वीकृतेति। तत्रैव द्वितीयसामग्रीत्वेन अनूदितग्रन्थहिन्दीसंस्कृतग्रन्थानुसन्धानपत्रिकादिसङ्ककलकत्वेन पुस्तकालय एव विशेषाधारो मन्यते। अतः पुस्तकालयविधिरपि अवलम्बितः।

### विमर्शनस्यसैद्धान्तिकाधारः

अयं साहित्यशास्त्रस्य एव विषयत्वात् साहित्यविषयाधारीकृताः ग्रन्थानवलम्ब्य तत्रापि रसाधारीकृतसूत्रविवेचनाभाष्यव्याख्यानाधारीकृत्यसिद्धान्तविचारः कृतो वर्तते। तत्रै काव्यप्रकाशरसगंगाधरकाव्यदीपिकाकुवलयानन्दचन्द्रालोकसाहित्यदर्पणनाट्यशास्त्रप्रभृतिसैद्धान्तिकग्न्थाः, टीकाग्रन्थाः, बृहत्व्याख्याभूतग्रन्थाञ्चाधारीकृत्य सिद्धान्तभूमिः संस्थापिताः वर्तते। उल्लिखितान् ग्रन्थान् विदुषाञ्च मतानुसारं रसविमर्शनं कृत्वा रसविवेको निर्णितो विद्यते।

### सीमाङ्कनम्

सकलसाहित्यशास्त्रस्य सकलनयशास्त्रस्य सकलशब्दशास्त्रस्य रसप्रयोगव्याख्याविषयमाधारीकृत्य विवेचनमत्र नसम्भवति। तेनात्र समासेन नाट्यशास्त्रकाव्यशास्त्रादिप्रमुखग्रन्थानाधारीकृत्य विमर्शकरणमेव अस्य अनुसन्धात्मकलेखस्य सीमा विद्यते। काव्यप्रकाशरसगंगाधरकाव्यदीपिकाकुवलयानन्दचन्द्रालोकसाहित्यदर्पण-नाट्यशास्त्रप्रभृतिभिः ग्रन्थैः साहाय्येन अनुसन्धानात्मकलेखनिर्मितिः सञ्जाता।

### पूर्वकार्यसमीक्षणम्

दार्शनिकसिद्धान्तदृशा रसस्य ज्ञानपक्षोद्घाटने तु विद्विद्भिरनेके प्रयासाः विहिताः सन्ति। साहित्यशास्त्रस्य परिचयदाने साहित्यशास्त्रपरम्पराविवेचने रसतत्त्वस्य विमर्शे रसान्तर्यविवेकोल्लेखनं कर्तुं शक्यत इति सङ्केतितं वर्तते। इममेव सङ्केताधारेणास्यलेखस्य लेखनायासो विधीयमानोऽस्ति। अत्र रसमाधृत्य विरचिता ग्रन्था आलेखाश्च पूर्वकार्यत्वेन गृहीता वर्तन्ते, ते एव चात्र समीक्षिताः सन्ति।

काव्यस्य रसवादीचिन्तने काव्यस्य गभीरा विवेचना प्राप्ता। तथैव नैकविधपत्रिकालेखाश्च प्राप्ता रसचर्चा रसेन साकमन्यस्य तुलना च कृता परन्तु विमर्शनाभावात् विवेचनाभावात् अयमायासः कृतो वर्तते। अतः रसस्य नानामतभेदपुरःसरं शोधलेखेऽस्मिन् विचारः कृतः, तदावश्यकश्च दृश्यते। येन रसस्य पृथक् पृथक् दृशा ज्ञानमाहर्तुं च शक्यते।

मुक्तिनाथढकालद्वारा नेपालीभाषायां 'रससूत्रको व्याख्याका मतान्तरहरू र यसको तात्पर्य' (२०७७) इति शीर्षके लिखितानुसन्धानलेखः मध्यबिन्दुमन्टिपलबहुमुखीक्याम्पसनामकसंस्थाद्वारा प्रकाशितायाः सरस्वतीसदनशोधपत्रिकायाः प्रकाशितेऽङ्के प्रकाशित आसीत्। उक्तानुसन्धानलेखे रसस्य व्याख्यायां आगतानां मतमतान्तरविषयस्य चर्चां कृत्वा निष्कर्षः साधितो वर्तते।

उक्तालेखे विशेषतः अनुमितिवादाभिव्यक्तिभुक्तिवादोत्पत्तिवादान्नवलम्ब्य रसविषयः चर्चितो वर्तते। तत्र वस्तुतः रसस्योत्पत्तिबिन्दुमन्वेष्य रससहकारिकारणसहितं रसान् परिगणय्य रसविवेचनं कर्तुं शक्यते परन्तु तदाभावो तत्र दृष्ट अतः दृष्टाभावं सम्पूर्य सविस्तारं रसविवेचना अस्मिन् लेखे कृता वर्तते।

त्रिभुवनविश्वविद्यालयस्य सहप्राध्यापकतुलसीप्रसादगौतमस्य 'रस र विरेचन सिद्धान्तको तुलानात्मक अध्ययन' (२०७७)इति शीर्षकस्यानुसन्धानात्मकालेखः त्रिचन्द्रबहुमुखीक्याम्पसनामकसंस्थाद्वारा प्रकाशितायाः सरस्वतीसदनशोधपत्रिकायाः प्रकाशितेऽङ्के प्रकाशित आसीत्। उक्तपत्रिकायां रसस्य समासचर्चां कृत्वा रसेन सह पाश्चात्यविरेचनसिद्धातस्य तुलना कृता वर्तते। तुलनाकरणे रसविषये गाम्भीर्यमत्र न प्राप्यते। अतः गभीरतामानेतुमस्यालेखस्य रचना सम्भूता।

रसविरेचनसिद्धान्तयोः तुलनात्मकाध्ययनं सम्यक्कृतं परन्तु रसस्य स्थायिभावविषये सहृयविषये रससहकारिविषये भरतस्य रससूत्रविषये मतान्तपूर्वककृतव्याख्याविषये च नोल्लेखः कृतोऽक्त लेखे। तेन रसविषयं विताय व्याख्यातुं अस्य शोधलेखस्य जन्म अभूत्। अत्रालेखे रसपरिचयं दत्त्वा स्वरूपञ्च प्रदर्श्य रसोत्पादनप्रक्रियासहितं दीर्घविवेचनमत्र कृतमस्ति।

खिलप्रसादबरालद्वारा नेपालीभाषायां 'रसप्रयोगका दृष्टिले केही समकालीन नेपाली गद्य कविता' (२०७७( लिखितानुसन्धानलेखः मध्यबिन्दुमन्टिपलबहुमुखीक्याम्पसनामकसंस्थाद्वारा प्रकाशितायाः सरस्वतीसदनशोधपत्रिकायाः प्रकाशितेऽङ्के प्रकाशित आसीत्। उक्तानुसन्धानलेखे रसविषयं स्पृष्ट्वा एव नेपालिगद्यकाव्येषु कथं रसप्रयुक्ति सञ्जातेति विषये प्रस्तुतम्।

उक्तालेखे विशेषतः कानिचन नेपालिकाव्यानि प्रस्तूय तत्र काव्येषु प्रयुक्तानां रसानां सोदाहरणं प्रस्तुतं वर्तते। समासेन रसचर्चां कृत्वा स्थायिभावानां च समासपरिचयं दत्त्वा काव्येषु रसप्रयोगः सन्दर्शितः परन्तु रसस्य विस्तरशः व्याख्या विवेचना नैव प्राप्ता। अतः विवेचनाय लेखोऽत्र संरचितो वर्तते। अत्रालेखे रसस्योत्पत्तिबिन्दुमन्वेष्य रससहकारिकारणसहितं रसान् परिगणय्य रसविवेचनं कृतं येन रसविषये सम्पूर्णतया ज्ञानं कोऽपि ग्रहितुं शक्यते।

विस्तारपूर्वकं व्याख्यानस्यावश्यकतां विचार्य नैकविधग्रन्थसाहाय्येन 'संस्कृतसाहित्ये रसविवेकः' इति लेखे अनेकविदुषां मतपुरःसरं दीर्घचर्चा विहिता।

## कृतज्ञताज्ञापनम्

लेखेऽस्मिन् काव्यप्रकाशरसगंगाधरकाव्यदीपिकाकुवलयानन्दचन्द्रालोकसाहित्यदर्पणनाट्यशास्त्रदिशा केचिदन्यरसविषयान्वितानुसन्धानात्मकपत्रिकादिशा च रसविचारविषये प्रविधिसाहाय्ये च कायेन मनसा वाचा सहयोगदातृभ्यः सुधीभ्यो गुरुवर्येभ्यो हार्दिकं धन्यवादं निवेदयामि।

## विषयगतविश्लेषणम्

रस्यते अस्वाद्यते इति करणव्युत्पत्या रसशब्दस्य व्युत्पत्तिर्जायते। अनन्दे हि साहित्यस्य वास्तविकप्रयेजनं मन्यते। रसास्वादनेनैव अनन्दानुभूतिः भवति। साहित्ये अनन्दाय करणरूपं वा साधनं रसो भवति।

सकलप्रयेजनमैलिभूतं समनन्तरमेव रसास्वासदनसमुद्भूतं विगलितवेद्यान्तरमानन्दम् इति मम्मटाचार्यो वदति। तथैव तैत्तिरीयोपनिषदि रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति इति वाल्मीकिरामायणेपि रसानामुल्लेखोस्ति रसैः शृङ्गारकरूणरैद्रवीरभयानकरिति वाल्मीकिरामायणे विशेषतः पञ्चरसाः स्वीकृता वर्तन्ते। अचार्यराजशेखरेपि स्वग्रन्थकाव्यमीमांशायां रसव्याख्यानमकरेत्। तत्रैव काव्यपुरूषोत्पत्तिनिरूपणप्रसङ्गे अचार्यशेखरेणोक्तम् यत्, शब्दार्थौ ते शरीरम्, संस्कृतं मुखम्। प्राकृतं ते बाहुः, जघनमपभ्रंशः, पैशाचं पादौ, उरो मिश्रम्, समः प्रसन्नो मधुरः उदार अजस्वी चासि। उक्तिचणं ते वचोः, रस अत्मा, रोमाणि छन्दांसि, प्रश्नोत्तरप्रवहिलादिकं च वाक्केलिः, अनुप्रासउपमादयः च त्वाम् अलङ्कुर्वन्ति।

पीयूषवर्षः चन्द्रालोकस्य षष्ठे मयुखे रसस्वरूपं दर्शयन् रसांगभूतानां विभादीनां सम्यक् निरूपणं कृतवान्। रसोत्पादकाः विभावादयः मुख्याः सन्ति। अचार्यदेवेन सहकारिकारणानां व्याख्या कृता। अलम्बनोद्दीपनात्मेति कथयित्वा लोके कार्यकारणप्रकरणे यं करणसंज्ञया कथयन्ति तत्ककारणं काव्ये विभावसंज्ञया निगदितं भवति। जयदेवानुसारं काव्ये यान्यपि वस्तूनि वर्णितानि भवन्ति तानि सर्वाणि लोकस्थानि कर्माणि भवन्ति। उदाहरणाय लोके कस्यचित् नायकस्य मनसि रतिकामादिविषये नायिका हेतुर्भवति। अत्र नायिका अलम्बन विभावो मन्यते। अस्यापि उद्दीपनालम्बनै द्वै भेदे स्तः। लोके यानि कर्माणि भवन्ति तानि सर्वाणि काव्येनुभवाः कथ्यन्ते। तृतीयः व्यभिचारी वा सञ्चारीति नाम्ना परिचीयते। विभिन्न रसेषु सञ्चरणं कर्तुं शक्नोति अतः सञ्चारी भाव कथ्यते। तथा त क्षणिकरूपेण एकरसे तिष्ठति अयं भावः। यथाः हर्षः, हर्षस्य भावो शृङ्गारे, वीरे, शान्ते, हास्यरसेषु प्राप्यते। हर्षस्मृतिव्रीडामोहधृतिशङ्काग्लानिप्रभृतित्रयस्त्रिंशत्भेदाः सञ्चारीभावाः सन्ति।

यथा कार्याभावे कारणस्य कारणाभावे कार्यस्य यथा अचित्यं न भवति तथैव काव्येपि स्थायिभावस्याभावे रसोत्पत्तिःअसम्भवः। रसोत्पत्तै स्थायिभावस्य ज्ञानं भवत्येव। केवलं स्थायिभावादिरेव न रसः, न विभावादिरेव न रसः। यथा न केवलं शर्करा न रसः न केवलं जलमेव न रसः जलशर्करमिश्रितं वस्तु एव रसरूपतां याति। रसोत्पादनमपि कठिनविषयो वर्तते। रसस्यानुभूतिरपि न सर्वेषां केवलं सहृदयानांमेव भवति। यथा ब्रह्मसाक्षात्कारे विगलितवेद्यान्तरत्वमावश्यकत्वं तथैव रसानुभूतावपि। अस्वाद्यमानतामात्रस्य तनुरिति।

एवञ्च रसस्यैलिककत्वं साध्यते यथाः ननु रसंप्रति विभावादीनां कारणत्वं स्वीकृयते चेन्न, दध्यादिन्याये न रसत्वेन परिणतेः। यथा पयः दधिरूपतया परिणतं जायते तथैव विभावादि स्थायिभावसंवलिताः रसरूपतां यान्ति। अतः विभावादयः कारणानि न भवन्ति रसस्तु न कार्यं भवति। यथा पयसि विकृते सति दधि भवति तथैव विभावादयः रसरूपत्वेन विकृताः भवन्ति केवलम्। ननु विभावादीनां रसं प्रति कारणताभावे प्रकाश्यप्रकाशकभाव स्वीकरणीय इति चेन्न, विभावादीनां रसरूपतायाः परिणतेः रसविभावाद्योरपृथग्भावात्। अर्थात् प्रकाश्यप्रकाशकयोः पार्थक्यं भवति। यथा दीपः प्रकाशकः घटः प्रकाश्यो भवति। तत्र दीपः पृथक् घटश्च पृथक् भवति। घटस्य सत्ता पूर्वमेव भवति यो विभावदिभिः प्रकाशयेत्।

ननु लोके कार्यकारणाभावात्तु किमपि न भवतीति कथ्यते, अतः रसविभावाद्योः कथं कार्यकारणपृथग्भाव इति चेदुच्यते यत्, रसस्यालैकिकत्वमिति। वस्तुतः रस अलैकिको वर्तते। इदमेवास्य परमं वैशिष्ट्यं विद्यते। काव्यप्रकाशकारः मम्मटाचार्यः रसं परिभाषमाणः लिखितवान् यत्,

कारणान्यथ कार्याणि सहकारीणि यानि च,
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।

विभावअनुभावास्तत् कथ्यन्ते व्यभिचारिणः
व्यक्तः सस्तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः (ज्योत्स्ना, १९९९, पृ.१६८)।

भरतमुनिना स्वनाट्यशास्त्रे विभावानुभावव्यभिचारीभावसंयोगाद्रसनिष्पत्तिः (नागर, १९८९, पृ. ७६) इति कथितम्। विभावानुभावव्यभिचारीभावसंयोत् रसोत्पादनं भवतीति भरतस्य विचारो दृश्यते। भरतसूत्रे विभावादीनां काव्ये रससम्पादने मुख्यभूमिका अनुभूयते। परन्तु संयोगनिष्पत्त्योः विषये संस्कृतसमालोचनायां विपुलविवादो दृश्यते। विवादस्य मूलाधारो संयोनिष्पत्ती एव। विवादात् चतुर्णां वादानां सम्प्रदायानां वा प्रादुर्भावोऽभूत्। उत्पत्तिवादानुमितिवादभुक्तिवादाभिव्यक्तिवादाश्चतुः सम्प्रदायाः परिगणिताः सन्ति। सपरिचयं चतुर्णामेव चर्चा कृयते यथाः

**उत्पत्तिवादः**

अस्य रसराद्धान्तस्य प्रणेता मीमांशाचार्यो भट्टलोल्लटोऽस्ति। असौ निष्पत्तिं उत्पत्तिरूपेणाङ्गीकरोति। संयोगं कार्यकारणसम्बन्धस्य अर्थे स्वीचकार। अनुकार्ये अर्थात् रामादौ रसोत्पत्ति भवतीति भट्टलोल्लटस्य मतमस्ति। अनुकार्यस्य अनुकर्तरि रसारोपत्वादस्य अरोपवाद इति अपर नाम विद्यते। संस्कृतसाहित्ये भट्टलोल्लटस्य सिद्धान्तोयं संस्थापितः परन्त्वत्र दोषा अपि समापतिताः सन्ति यत्, अनुकार्ये रसोत्पत्ति जायमाने अन्यत्र रसारोपो कर्तुमसम्भवो भवति। तथैव दर्शकैः साकमनुकार्यस्य सम्बन्धाभावादपि दोषाग्रस्तोयं सिद्धान्तः।

**अनुमितिवादः**

अनुमितेरर्थ अनुमानमित्यपि भवति। न्यायदर्शनाचार्येण शङ्कुना अनुमितिवादस्य रचना कृता। अनुमानमाधारीकृत्य सिद्धान्तस्यास्य प्रादुर्भावोऽभूत्। अत्र निष्पत्तेरर्थ अनुमानमिति, संयोगश्च अनुमाप्यअनुमापकसंम्बन्धेन अर्थ्यते। अत्र अनुमाप्यः रसः, विभावानुभावव्यभिचारीभावाः अनुमापकाः स्वीकृताः सन्ति। चित्रतुरङ्गन्यायेनास्य वादस्य विवेचना कृता वर्तते। यथा अयथार्थचित्रं दृष्ट्वा प्रेक्षकाः रमन्ते अनन्दानुभूतिञ्च कुर्वन्ति तथैव अभिनेतरि नटे रामस्वरूपं मत्वा अनुमाय वा अनन्दानुभूतिः भवतीति अस्य सिद्धान्तस्य मूलाधारे वर्तते। अतः अनुमानं कृत्वा रसानुभूति सम्पद्यत इति अस्य मान्यता दृश्यते। अत्रापि दोषाः सन्ति। न्यायदर्शनानुसारं अनुमानज्ञानन्तु भवत्येव परन्तु अत्र नटप्रेक्षकयोः सम्बन्धः स्पष्टो न भवति। तथा च अनुमाय केपि अनन्दिताः चमत्कृताश्च भवितुं न शक्नुवन्ति। तेन दोषग्रस्तोयं राद्धान्तः।

**भुक्तिवादः**

साङ्ख्यदर्शनाचार्येण भट्टनायकेन सिद्धान्तोऽयं प्रणितः। असै निष्पत्तिं भुक्तिरूपेण भोग वा स्वीकरोति। भोज्यभोजकसम्बन्धेन संयोगस्य विवेचनात्र भवति। भट्टनायकानुसारन्तु नटे नायके वा स्थायीभावो भवति, दर्शकेषु रसोत्पादनं भवति। अत्र अभिधायाः नाटकस्य ऋज्वर्थः ज्ञायते। भावकत्वात्तु समष्टिरूपं ज्ञातुं शक्यते। भावकत्वस्योत्कर्षतायाः भोजकत्वावस्थायाः प्राप्तिर्भवति। अस्यामवस्थायां रजस्तमोगुणौ विलीनौ भवतः। सत्त्वगुणे वर्धमाने सति दर्शकाः रसानुभूतौ गच्छन्ति। सिद्धान्तोयं यथार्थसमीपे अस्ति परन्तु विचारखण्डनेन कोचित् दोषौ दृश्येते। भट्टनायकस्य अभिधाया उल्लेखः शब्दशक्तौ प्रप्यते परन्तु भोजकत्वभावकत्वयोरूल्लेखः अन्याय्य इति

विचारखण्डितो वर्तते। शब्दशक्त्यन्तर्गते लक्षणाव्यञ्जने स्त अतः भावकत्वभोजकत्वयोरावश्यकता नास्तीति अपि विदुषां मतानि सन्ति।

**अभिव्यक्तिवादः**

अद्वैतवेदान्ताचार्य अभिनवगुप्तामहोदय अभिव्यक्तिवादस्य स्रष्टा अस्ति। असौ निष्पत्तिं अभिव्यक्तिरूपेण व्यञ्जनारूपेण च स्वीकरोति। संयोगश्च व्यङ्ग्यव्यञ्जकसम्बन्धेन ज्ञायते। अत्र रसः व्यङ्ग्यः, विभावादिः व्यञ्जको मन्यते। कार्यकारणायोः सार्थक्यमपि अत्र दृश्यते। अस्य सिद्धान्तानुसारन्तु कार्यं रसः, विभावानुभावव्यभिचारीभावाः कारणानि सन्ति। अर्थात् अव्यक्तरूपेण सुप्ताः स्थायीभावाः विभावादिकारणद्वारा व्यक्ताः जागृता वा भवन्ति।

वादे वादे तत्त्वबोधः, इति कथनानुसारं वादविवादं कृत्वा तत्त्वज्ञानं लभते। रसविषयेपि विदुषां मतैवैविध्येन मतान्तरं दृश्यते तथापि निष्कर्षे नायके एव स्थायिभावाः भवन्ति, तान्नेव स्थायीभावान् विभावानुभावव्यभिचारीभावाः जागरणाय कारणानि भवन्ति। अतः रसानुभूतिर्भवति। इत्थङ्कारं रसं विवेच्य निष्कर्षोपि समासाधितः, रसः किं करोति, कुतश्चायातीति विषये निर्णयोऽभूत्।

मम्मटस्य शब्दैः भावोऽयं विद्यते यत्सामाजिकानां हृदयेषु वासनात्मकसंस्काररूपेण पूर्वत एव विद्यमाना स्थायिभावाः काव्यश्रवणकाले, अथवा नाट्यदर्शनसमये सीतादिअलम्बनविभावैः, उद्यानादिउद्दीपनविभावैः, कटाक्षभुजाक्षेपादिअनुभावैः तथा निर्वेदादिसंचारिभावैः सहकारिभिः कारणैः व्यङ्ग्यव्यञ्जकसम्बन्धेन संयुक्ताः सन्तः साधारणीकरणद्वारा रसरूपेण अभिव्यज्यते। एषाभिव्यक्तिः समीचीना तथा तथैव भवति यथा मृत्तिकायाः घटे पूर्वतः एव विद्यमानः गन्धः जलस्य संयोगं प्राप्य प्रकटितो भवति। रसविषये लम्बायमाना चर्चापि कर्तुं शक्यते नैकविधविद्वद्भिः अध्ययनमनुसन्धानञ्च कृतम्, रसविषये नानाग्रन्थाश्च भारतवर्षे लिखिताः सन्ति। रसविषये बहुमन्थनं कृत्वा चान्ते शृङ्गारवीरकरूणाद्भूतहास्यभयानकबीभत्सरोद्रशान्ताः नवरसा अङ्गीकृताः सन्ति। अदौ उदाहरणाय अचार्यपीयूषवर्षेण श्रृङ्गारतः शान्तरसपर्यन्तं नवरसाः कथं स्वीकृताः सन्ति ? इति दृश्यते यथाः

अनुभावैः कटाक्षाद्यैरून्मादाद्यैर्यथाक्रमम्।
सम्भोगो विप्रलम्भश्च श्रृङ्गारो द्विविधो मतः।।
हासस्थायी रसो हास्यो विभावाद्यैर्यथाक्रमम्।
वैरूप्यफुल्लगण्डत्वावहित्थाद्यैः समन्वितः।
अभीष्टविप्रयोगाश्रुपातग्लान्यादिभिः क्रमात्।।
विभावाद्यैर्युतः शोकस्थायी स्यात्करूणो रसः।
क्रोधस्थायीरसो रोद्रो विभावाद्यैः समन्वितः।।
मात्सर्यहस्तनिष्पेषसंमोहाद्यैर्यथाक्रमम्।
उत्साहाख्यस्थायिभावः प्रभावादिविभावभूः।।
वीरोनुभावैः स्थैर्याद्यैर्भावैर्गर्वादिभिर्युतः।
व्याघ्रादिभिर्विभावैस्तु वेपिताद्यनुभावभृत्।।
भावैर्मोहादिभिर्युक्तो भयस्थायी भयानकः।
स्थायी जगुप्सा बीभत्सो विभावाद्या यथाक्रमम्।।
अनिष्टेक्षणनिष्ठीवमोहाद्या यत्र संमताः।

अद्भूतो विस्मयस्थायी मायादिकविभावभूः ।।
रोमाञ्चाद्यानुभावोयं स्तम्भादिव्यभिचारिकः ।
निर्वेदस्थायिकः शान्तः सत्सङ्गादिविभावभूः ।।
क्षमादिकानुभावोयं स्तम्भादिव्यभिचारिकः (शर्मा, २०१६, पृ.१०५) ।।

साहित्यदर्पणे विश्वनाथः रसस्वरूपं प्रतिपादयति यद् रसो ब्रह्मास्वादसहोदरः यथाः

वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः (सिंह, २००७, पृ.१०५) ।।

कोऽयं रस इति जिज्ञायामुच्यते यथा काव्यस्य पठनेन, नाटकस्य च दर्शनेन सहृदयानां हृदयेविगलितवेद्यान्तरशून्यो य आनन्दोनुभूयते स एव रसपदवाच्य इति सार्वनीनामनुभवः। नाट्यशास्त्रकारेण भरतमुनिना प्रतिपादितमस्ति यत् रस इति कः पदार्थः ? उच्यते आस्वाद्यमानत्वात्। कथम् आस्वाद्यते रसः ? यथा हि नाव्यञ्जनसुसिद्धान्नं भुंजाना रसानास्वादयन्ति सुमनसः पुरूषा हर्षादींश्च अधिगच्छन्ति, तथा नानाभावाभिनयव्यंजितान् वागङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्चाधिगच्छन्ति (नागर, १९८९, पृ.८७)। अत्र रसाभावयोश्च परस्परं पोषाकन्तम्। रसः सर्वेषां भावानां मूलम्, यथा बीजं वृक्षपुष्पादेः (नागर, १९८९, पृ.३९) इति। कविराजविश्वनाथः कथयतिः

विभावेनानुभावेन व्यक्तः सञ्चरिणा सह।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम् (सिंह, २००७, पृ.१६९) ।।

कथं रसनिष्पत्तिरिति जिज्ञासायां तेनोच्यते, विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः। अत्र विभावाः कारणानि, अनुभावाः कार्याणि, व्यभिचारिणश्च सहकारिणः, इत्येषां संयोगाद् रसस्य निष्पत्तिः। अत्र निष्पत्तिः शब्दस्य व्याख्या चतुर्भिः विद्वद्भिः चतुर्धा प्रतिपादिता, क) भट्टलोल्लटस्य उत्पत्तिवादः। ख) श्रीशंकुकस्य अनुमितिवादः ग) भट्टनायकस्य भुक्तिवादः घ) अभिनवगुप्ताचार्यस्य अभिव्यक्तिवादः। विभावैर्विभावितोनुभावैरनुभावितो व्यभिचारिभिः संयुक्तो हि स्थायीभावो रसपदवाच्यः।

स्यायिन अविच्छिन्नप्रवाहरूपस्य रत्यादेः रमणीविषयकप्रीत्यादेः लोके व्यवहारे यानि कारणानि ललनादीनि आलम्बनकारणानि चन्द्रोदयादीनि उद्दीपनकारणानि। अथ च कार्याणि रत्यादिजन्यानि नायिकादिभेदेन नानाविधानि कटाक्षादीनि सहकारीणि रत्यादिकार्यस्य शीघ्रप्रतीतै सहायकानि निर्वेदादीनि तानि नाट्यकाव्ययोः चेत् यदा निबध्यन्ते तत् तदा क्रमेण विभावानुभावव्यभिचारिणः कथ्यन्ते। विभावाः कारणरूपाणि, अनुभावाः कार्यरूपाणि, व्यभिचारिणः सहायकरूपाणि च इति ज्ञायन्ते। अतिसूक्ष्मरूपेणावस्थितान् रत्यादीन् विभावयन्ति आस्वादयोग्यतामानयन्ति इति विभावाः। तान्येव इत्यादीनि अनुभावयन्ति अनुभवः, विषयतामापादयन्ति इत्यनुभवाः। रत्यादीनेव विशेषेण अभितः सर्वाङ्गव्यापितया कार्यं शरीरे चारयन्तीति व्यभिचारिणः। रसभेदान् स्पष्टीकुर्वन् रसगंगाधरकृत् पण्डितराजजगन्नाथ आह,

श्रृङ्गार करूणः शान्तो रोद्रै वीरोऽद्भूतस्तथा।
हास्यो भयानकश्चैव बीभत्सश्चेति ते नव (मिश्र, झा, २०२२, पृ.११५) ।।

केचिदाचार्याः शान्तरसं न स्वीकुर्वते। जगन्नाथ अस्य समाधानं कुर्वन् कथयति यन्नाटके शान्तरसस्य निषेधो मन्यते।

शान्तस्य समसाध्यत्वानटे च तद्सम्भवात्।
अष्टावेव रसा नाट्ये, न शान्तस्तत्र युज्यते (मिश्र, झा, २०२२, पृ.११७)।।
अतः रसाः नव एव भवन्ति एवञ्च तेषां नव एव स्यायिभावाः भवन्ति, क्रमशः रसानां परिचयः एवं वर्तते,

**श्रृङ्गाररसः (रतिस्थायीभावः)**

कामोद्रेकार्थस्य संस्कृतव्याकरणस्य शृङ्गधातोः शृङ्गारशब्दनिर्माणोऽभूत्। कामावस्थाप्राप्तिरेव शृङ्गारस्यार्थो भवति। संयोगवियोवभेदेन द्विधा अपि पठ्यते। संयोगावस्थायां नायकनायिकयोः संयोगो भवति। तथैव वियोगावस्थायां वियोगेन नायकनायिके वियोगजन्यपीडायां भवतः। परस्परं प्रणयभावनायाः वार्ता भवति परन्तु संयोगाभावो दृश्यते। रतिस्थायिभावेन समन्वितस्य शृंगारसस्य लक्षणं ददता पण्डितराजजगन्नाथेन विलिखितम्, स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यचित्तवृत्ति विशेषो रतिः स्थायिभावः अर्थात् स्त्रीपुरूषयोः पारस्परिकप्रेमनाम्नी या चित्तवृत्तिर्भवति, सा रतिसंज्ञकस्थायिभावोऽभिधीयते। श्रृंगाररसः संयोगस्य तथा विप्रलम्भस्य भेदाभ्यां द्विधा भवति, तत्र श्रृंगारो द्विविधः क्रमानुसारं वर्ण्यते। संयोगश्रृंगारः, रतिः यदा स्त्रीपुरूषयोः उभयोः संयोगकाले उपभुज्यते तदा तत्र संयोग श्रृंगारो भवति, रतेः संयोगकालावच्छिन्नत्वे प्रथमः। उदाहरणम्,

शयिता राविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्।
दयितादयिताननाम्बुजं दरमीलन्नयना निरीक्षते (मिश्र, झा, २०२२, पृ.३२)।।

उक्तोदाहरणे नायिकासम्मतरतेः आलम्बनविभावो नायकोऽस्ति। एकान्तस्थानादय उद्दीपनभावाः। नायिकया नायकस्य मुखकमलस्यावलोकनम् अनुभावो विद्यते। लज्जाऔत्सुक्यादिना संयोगेन समन्वितश्रृंगार रसोऽभि व्यज्यते।

विप्रलम्भ श्रृंगारः यदा रतिः स्त्रीपुरूषयोः वियोगकाले उपभुक्ता न भवति, तदा विप्रलम्भश्रृंगारः सञ्जायते। वियोगकालावच्छिन्नत्वे द्वितीयोदाहरणम्,

वाचोमाङ्गलिकी प्रयाणसमये जल्पत्यनल्पं जने,
केलीमन्दिरमारूतायनमुखे विन्यस्तवक्राम्बुजा।
निश्वासग्लपिताधरोपरिपतद् वाष्पार्दवक्षोरूहा।
बाला लोलविलोचना शिव शिवं प्राणेशमालोकते (मिश्र, झा, २०२२, पृ.१३३)।

तथैव संयोगश्रृङ्गारस्योदाहरणमपि यथाः,

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
निद्राव्याजमुपागतस्य सुचिरं निर्वण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकमालोक्य गण्डस्थलीम्
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता (सिंह, २००७, पृ.२६)।।

पद्येऽस्मिन् कश्चिन्नायिका कान्ता वा शून्यगृहं विलोक्य शनैः शयनादुत्थाय निद्राव्यामुपागतस्य पत्युः समीपं गच्छति ततः पतिः जातपुलकां लज्जायुतां नम्रमुख्याः गण्डस्थलीं परिचुम्बति। रतिरागभावान्वितपतिकान्ते हसतः। अत्र पतिकान्ते विभावौ स्तः। चुम्बनादिकार्यमनुभावः, तथा च हसनादिकार्यम्, व्यभिचारिभावः विद्यते। अतः विभावानुभावव्यभिचारिभावाद्रसनिष्पत्तिः सञ्जाता।

एका सखी स्वअपरसख्याः दयनीयां दशां विलोक्य मनसि चिन्तयति यदस्याः पति परदशं गच्छति, शुभचिन्तकाः जनाः शोभनवचनानि वदन्ति परन्तु इयं मुग्धा रतिमन्दिराणां वातायनेषु मुखकमलं निक्षिप्य

उपविष्टाऽऽस्ते। तस्याः श्वासगतिः तीव्राऽस्ति, तस्मादस्या अधरओष्ठौ शुष्कौ सञ्जातौ स्तः। तथा अधरेषु पतित्वा निम्नप्रदेशगामिन्या अश्रुधारया, तस्या उरोजी आद्रौ सम्भूतौ स्तः। शिवशिव एतां दुर्दशां प्राप्ता सा बाला चञ्चलनेत्राभ्यां स्वप्राणप्रियम् आलोकयति तस्याः यात्राकाले अश्रुपातजन्यापशकुनस्य बोधो न विद्यते। अत्र नायकःआलम्बनविभावः, अश्रुपातनिःश्वासाः अनुभावाः, विषादचिन्तावेगव्यभिचारिभावानां संयोगात् नायिकायाः रतिः अभिव्यञ्जिता भवति, या वियोगकाले विद्यमानत्वात् वियोगश्रृंगारोऽस्ति।

**२) करूणरसः (शोकस्थायिभावः)**

मृतत्व ज्ञानदशायां तु रतिपोषाकस्य वैक्लव्यस्येति अर्थात् प्रेमपात्रस्य मरणे ज्ञाते सति स्त्रीपुरूषयोः वियोगसमुत्पन्ना व्याकुलता एव प्रधाना भवति तथा रतिर्भवति तत्पुष्टिकारिणी, एवंविधा दीप्तिरेव करूणरसो भवति। प्रियवस्तुना साकं वियोगः, नानाघटना, अनिष्टप्राप्तिश्च करूणरसाय कारणानि भवन्ति।

उदाहरणम्,

अपहाय सकलवान्धव चिन्तामुदवास्य गुरूकुलप्रणयम्।

हा तनय ? विनयशालिन् ? कथय कथमिव परलोकपथितोऽभूः (मिश्र, झा, २०२२, पृ.१३५)।।

अत्र स्वमृतपुत्रमवलोक्य पिता कथयति, हा ! अतिविनीतपुत्र ! त्वं सर्वबन्धूनां चिन्तां विहाय एवं गुरूकुलस्य स्नेहमपि विस्मृत्य कथं परलोकस्य पथिको जातः ? अत्र मृतपुत्र आलम्बनविभावः, उपस्थितबान्धवानां दर्शनादि उद्दीपनविभावः, रोदनमनुभावः तथा दीनतादयः व्यभिचारिभावाः सन्ति। अतोऽत्र करुणो रसः।

**शान्तो रसः (निर्वेदस्थायिभावः)**

नित्यानित्यवस्तुविचारजन्मा विषयविरागाख्यो निर्वेदः। अस्मिन् रसे समतायाः भावो भवति। सुखदुःखे च समाने भवतः। शान्तरसस्य स्थायिभावस्य विषये मतभेदो दृश्यते। अभिनवगुप्तधनञ्जयौ शमं स्थायिभावत्वेन स्वीकुर्वतः। मम्मटार्यस्तु निर्वेदं स्वीकरोति। विरक्तिस्तु निर्वेदः, शमस्च आन्तरिकशक्तिः। नित्यानित्यवस्तूनां विचारेण उत्पत्तिर्भवति, तद्विषयविरक्तिनाम्नी चित्तवृत्तिः निर्वेदः प्रोच्यते। उदाहरणम्,

मलयानिलकालकूटयोरमणीकुन्तलभोगिभोगयोः।

स्वपचात्मभुवो निरन्तरा मम जाता परमात्मनि स्थितिः (मिश्र, झा, २०२२, पृ.१३६)।।

इयं कस्यापि आत्मज्ञानिनः उक्तिरस्ति, यन्मलयपर्वतस्य पवने विषे च, कामिनीनां केशकलापे सर्पस्य च फणे एवं चाण्डालकन्यायां तथा ब्रह्मणि भेदभावरहिता मम स्थितिः परमात्मनि सञ्जाता विद्यते। अत्र सम्पूर्णजगदेव आलम्बनम्, अखिलपदार्थैः सह साम्यबुद्धिः अनुभावः एवं मत्यादयः सञ्चारिभावाः सन्ति। अतोऽत्र शान्तो रसः।

**रौद्ररसः (क्रोधस्थायिभावः)**

गुरूबन्धुवधादिपरमापराधजन्मा प्रज्वलानाख्य क्रोधः। अर्थात् गुरूपुत्रबन्ध्वादीनां हत्याद्यपराधेन ज्वलननामकचित्तवृत्तिः क्रोधः कथ्यते। एवञ्च शत्रोः अपमापूर्णव्यवहारः, देशधर्मयो अपकाराच्च अस्य जन्म भवति। उदाहरणाय एकः श्लोकः प्रदीयते,

नवोच्छलितयौवनस्फुरदखर्वगर्वज्वरे,

मदीयगुरूकार्मुकं गलितसाध्वसं वृश्चति।

ययं पततु निर्दय दलितदृष्टभूभृदगलत्,

स्खलद् रुधिरघस्मरो मम परश्व घो भैरवः (मिश्र, झा, २०२२, पृ.१३८)।।

अस्मिन् श्लोके भगवतः शिवस्य धनुषः भग्नकर्ता आलम्बनम् अस्ति। निर्दयतापूर्वकं धनुषः भग्नत्वं उद्दीपनम्। कटुवचनमनुभावः तथा उग्रता व्यभिचारिभावो विद्यते।

**वीररसः (उत्साहस्थायिभावः)**

वीररसं परभाषमाणेन जगन्नाथेन उक्तम्, परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्यः उत्साहः। अपरस्य पराक्रमेण तथा दानादिस्मरणेन उत्पद्यमान उन्नततानाम्नी चित्तवृत्तिः उत्साहः प्रोच्यते।

पण्डितराजो जगन्नाथो वीररसस्य चतुरः भेदान् मनुते, ये दानदयायुद्धधर्मरूपेषु विभक्ताः सन्ति। वीरश्चतुर्धा, दानदयायुद्धधर्मैस्तदुपाधेरुत्साहस्य चतुर्विधत्वात्। दानवीराः, दयावीराः, धर्मवीरा, युद्धवीराश्च भवन्ति। प्रथमं दानस्योदाहरणं प्रस्तूयते, याचकवेशमाधाय इन्द्रः यदा कर्णकुण्डलान् याचते तदा कर्णः कथयति, यन्मह्यमिदं तुच्छं वृत्तमहं यद् साधारणं कवचं कुण्डलं न प्रददे। (अहम्) निर्दयनापूर्वकं खड्गेन सत्वरं छित्वा प्रवहतरधिरधारया युक्तं स्वीयं समर्पितुं शक्नोमि।

अत्र याचक इन्द्र आलम्बनम्, तद्वारा कृता प्रशंसा उद्दीपनम्, कवचकुण्डलादीनां समर्पणम् अनुभावः तथा अहम् एवं मत्कृते कथनं सञ्चारिभावः। अत अयं वीररसस्य दाननामको भेदो वर्तते। नैकधा उदाहरणानि सन्ति वीररसस्य। अत्र उदाहरणाय एकः श्लोकः प्रदीयते यत्,

क्षुद्राः संत्रासमेते विजहित हरयः क्षुण्णशक्रेभकुम्भाः,

युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः।

सौमित्रे तिष्ठ पात्रं त्वमसि न हि रूषां नन्वहं मेघनादः

किञ्चिदभ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि (ढकाल, २०६७, पृ.६२-६३)।।

पद्येऽस्मिन् रावणपुत्रस्य मेघनादस्य वानरसेना प्रति लक्ष्मणं प्रति वचनमस्ति। श्लोके मेघनादस्य उत्साह एव स्थायी भाव वर्तते। रामस्यान्वेषणात् राम एवात्र विभावोऽस्ति। रामद्वारा कृतं समुद्रबन्धनमुद्दीपनमस्ति। कपेः तिरस्कारः, रामस्यान्वेषणमत्र अनुभावाः सन्ति। इन्द्रगजस्य कपोलभेदरूपा स्मृतिः तत्स्मृत्वा अहङ्कारानुभूतिः व्यभिचारीभावाःसन्ति। अतः उत्साहेति स्थायीभावः उल्लिखितविभादिभिः समुत्पन्नः, तेन पद्यमिदं वीररसमयमस्तीति स्पष्टम्।

**अद्भुतरसः (विस्मयस्थायिभावः)**

अलौकिकासाधारणविचित्रवस्तुदर्शनादिजन्मा विकासाख्यो विस्मयः। अर्थात् लोकोत्तरस्य कस्यापि वस्तुनः दर्शनेन अथवा स्मरणादिना उत्पद्यमानआश्चर्यनामकचित्तवृत्तिः विस्मयोऽभिधीयते। उदाहरणम्,

चराचरजगज्जालसदनं वदनं त्व।

गलद्रगनगाम्भीर्य वीक्ष्यास्मि हृतचेतना (मिश्र, झा, २०२२, पृ.१५८)।।

माता यशोदाऽत्र भगवतः कृष्णस्य मुखं विलोक्य कथयति यत्, चराचरजगतः निवासस्थानं तथा यस्य पुरतः गगनस्य गम्भीरताऽपि नश्यति, तत् तवाननं विलोक्य मम चेतनता समाप्ता जाता, आश्चर्येण अयं हतबुद्धिः सञ्जाताऽस्मि। अत्र कृष्णस्य आननम् आलम्बनम्, चराचरजगतः वर्णनमुद्दीपनम्, हृदयस्य चेतनता तथा

तद्गम्यरोमाञ्चः, नेत्रविस्फारणादि अनुभावाः विद्यन्ते। त्रासादयः व्यभिचारिभावाः वर्तन्ते। एभिः सर्वैः अद्भुतो रसो व्यज्यते।

**हास्यरसः (हासस्थायिभावः)**

वागङ्गादिविकारदर्शनजन्मा विकासाख्यो हासः, अर्थात् अन्यषाम् अङ्गवचनवेषभूषादिषु विकारदर्शनात् उत्पन्ना विकासनाम्नी चित्तवृत्तिः हासः कथ्यते। रूपे, आकृतौ, धारितवाससि प्रायः हास्यरसोत्पादनाय करणानि भवन्ति। आत्मस्थपरस्थभेदेन हास्यस्यापि द्वौ भेदौ स्तः। यदि हास्यविषयमवलोक्य स्वस्मिन्नेव हासोत्पादनं भवति चेत् तर्हि आत्मस्थति कथ्यते। यदि हसमानमन्य दृष्ट्वा स्वस्मिन्नपि हासभावना उत्पद्यते चेत्तर्हि परस्थेति कथ्यते। रसेऽस्मिन् मुखाकृतिकृयाकलापवचनादि आलम्बनविभावो भवति, विकृतरूपादिः उद्दीपविभावो भवति एवञ्च नेत्रसङ्कोचननिमीलादिः व्यभिचारिभावो भवति। उदाहरणम्,

श्रीतातपादैर्विहिते निबन्धे निरूपिता नूतनयुक्तिरेषा।
अङ्गगवां पूर्वमहोपवित्रं कथं न वा रासभधर्मपत्न्या (मिश्र, झा, २०२२, पृ.१६१)।।

एकतार्किकस्य पितुः पुत्रः कथयति यत्, श्रीमन् पितः ! भवद्रचिते निबन्धे एषा एका नवीना युक्तिः दृश्यते यद् यदा गवां पूर्वअंग पवित्रम् तदा गर्दभस्य धर्मपत्न्याः तदंगं कथं पिवत्रं न भवितव्यम्। अर्थात् गौः गर्दभी च समाने स्तः। अत्र मूर्खपुत्र आलम्बनविभावः, तस्य निःशंककथनमुद्दीपनम्, दन्तान् प्रदर्श्य हसनम् अनुभावः, उद्वेगादयः व्यभिचारिभावाः सन्ति। अतः स्पष्टमस्ति यदत्र हास्यो रसः।

**भयानकरसः (भयस्थायिभावः)**

व्याघ्रदर्शनादिजन्मा परमानर्थविषयको वैक्लव्याख्यः तद् भयम्। अर्थात् व्याघ्रादीनां दर्शनात् उत्पद्यमाना व्याकुलतानाम्नी चित्तवृत्तिः भयं कथ्यते। भयप्रदवस्तुना, भयददृश्येण, भयदायकसमाचारश्रवणेन अतीतस्मृत्या च भयोत्पन्नं भवति। अन्धकारहिंस्रकजन्तुभूतप्रेतादिशङ्काबलवत्वक्तिरिपुप्रमृतयः रसस्यास्य आलम्बनविभावाः भवन्ति। उदाहरणम्,

श्येनमम्बरतलादुपागतं शुष्यदाननविलो विलोकयन्।
कम्पमानतनुराकुलेक्षणः स्पन्दितुं नहि शशाक लावकः (मिश्र, झा, २०२२, पृ.१६४)।।

एकः दर्शकः कथयति यद् विवशलावकः (कश्चित्पक्षी) यदा गगनतलात् उपागतं श्येनपश्यत् तदेव तस्य मुखं अशुष्यत्, शरीरं प्रकम्पितमभवत्, नेत्रे व्याकुलितेऽभवताम् एवं सः स्पन्दितुं न अशक्नोत्। अत्र श्येनः आलम्बनविभावः, तस्य वेगेन उत्लवनम्, उद्दीपनम् मुखस्य शुष्कत्वमनुभावस्तथा दैन्यादयः व्यभिचारिभावाः सन्ति।

**बीभत्सरसः (जुगुप्सा)**

बीभत्सरसस्य लक्षणं कुर्वन् जगन्नाथोऽवोचत्, कदर्यवस्तु विलोकनजन्मा विचित्साख्यश्चित्रवृत्तिविशेषो जगुप्सा, अर्थात् कस्यापि, निन्दितवस्तुनः दर्शनेन उत्पाद्यमाना घृणानाम्नी चित्तवृत्तिः जुगुप्सा अभिधीयते। रक्तमांसमलमूत्रकुत्सितगलितवस्तुद्वारा जुगुप्सादिः उत्पद्यते। उदाहरणम्,

नखैर्विदारितान्त्राणां शवानां पूयशोणितम्।
आननेष्वनुलिम्पन्ति दृष्टा बेतालयोषितः (मिश्र, झा, २०२२, पृ.१६५)।।

अर्थात् हर्षयुक्ताः वेतालस्त्रियः शवानाम् आन्त्राणि विदार्य स्वमुखेषु पूयं शोणितञ्च लेपयन्ति। अत्र कस्यापि श्मशानस्य वर्णनमास्ते। अत्र शवाः आलम्बनविभावाः, आन्त्राणां विदारणमुद्दीपनम्, रोमाञ्चनेत्रसंकोचादय अनुभावाः सन्ति तथा आवेगादयः व्यभिचारिभावाः विद्यन्ते एभिः सर्वैः युक्तोऽत्र बीभत्सो रसः।

## उपसंहारः

रसनिष्पत्तिविषयकं सर्वप्रथममुल्लेखं भरतमुनिना नाट्यशास्त्रे कृतम्। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः भरतस्य रससूत्रस्य व्याख्यायामुत्तराचार्यैः स्वशक्त्याः प्रयोजनं कृतम्। परिणामतः उत्पत्तिवादस्य अनुमितिवादस्य भुक्तिवादस्य अभिव्यक्तिवादस्य सिद्धान्तचतुष्टयस्य विकासः जायते। भट्टलोल्लटस्य मतानुसारं विभावानुभावव्यभिचारिभावानां च संयोगेन रसस्य उत्पत्तिर्भवति। शंकुकेन सामाजिकस्य रसास्वादनं अनुमितिवादेन मुख्यतो विवेचितम्। भट्टनायको रसस्य अनुमेयं न मन्यते, अपि तु भोज्यं मन्यते। भट्टलोल्लटेन उत्तरमीमांशायाः शंकुकेन न्यायस्य भट्टनायकेन सांख्यस्याधारेण स्वस्वमतानां स्थापना कृता तथैव अभिनवगुप्तेनापि स्वपूर्ववर्तिन अलङ्कारशास्त्रस्य प्रमुखध्वनिवाद्याचार्यस्य आनन्दवर्धनस्याधारेण अभिव्यक्तिवादस्य प्रतिपादनं कृतम्। अभिनवगुप्तस्य इदं मतं दर्शनमूलत्वात् मनोवैज्ञानिकचिन्तनपरत्वाद् यथार्थभावेन रसविश्लेषणाच्च अद्यत्वेऽपि सर्वैरपि काव्यतत्त्वज्ञैः गृह्यते स्वीक्रियते प्रशस्यते च।

## सन्दर्भग्रन्थसूची

ढकाल, वेणीमाधवः (वि.सं.२०६७) *काव्यदीपिका*, विद्यार्थी पुस्तक भण्डार।

त्रिपाठी, जयशङ्करलालः (सन् २०२४) *कुवलयानन्द,* चौखम्बा संस्कृत सिरिज आपिस।

नागर, रविशङ्करः (सन् १९८९) *नाट्यशास्त्रम्,* परिमल पब्लिकेसन।

मिश्र, नारायणः, शर्मा, सत्यनारायणः (सन् २०२२) *रसगङ्गाधर,* चौखम्बा कृष्णदास अकादमी।

मोहन, ज्योत्स्ना (सन् १९९९) *काव्यप्रकाशः,* नागप्रकाशन।

शर्मा, नन्दकिशोरः (सन् २०१६) *चन्द्रालोक,* चौखम्बा संस्कृत सिरिज आपिस।

शास्त्री, प्रमोदचन्द्रः (सन् २०१२) *भतृहरिशतकम्,* श्रीठाकुरप्रसाद पुस्तक भण्डार।

सिंह, सत्यव्रतः (सन् २००७) *साहित्यदर्पण,* चौखम्बा विद्याभवन मनुस्मृति।